# माण्डूक्यकारिका

# अद्वैतप्रकरणम्

ओंकार-निर्णये (अध्याय १) उक्तः प्रपञ्चोपशमः शिवोऽद्वैत आत्मेति प्रतिज्ञा-मात्रेण।

ज्ञाते द्वैतं न विद्यते (का. १.१८) इति च। तत्र द्वैताभावस्तु वैतथ्य-प्रकरणेन स्वप्न-माया-गन्धर्वनगरादि-

दृष्टान्तैर्दृश्यत्वाद्यन्तवत्त्वादि-हेतुभिस्तर्केण च प्रतिपादितः। अद्वैतं किमागम-मात्रेण प्रतिपत्तव्यम्, आहोस्वित्

तर्केणापीत्यत आह शक्यते तर्केणापि ज्ञातुम्। तत्कथमित्यद्वैत-प्रकरणमारभ्यते।

उपास्योपासनादि-भेद-जातं सर्वं वितथम्, केवलश्चात्मा अद्वयः परमार्थ इति स्थितम् अतीते प्रकरणे। यतः -

**उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्त्तते ।**

**प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ।। ३.१ ।।**

उपासनाश्रितो धर्मो (जीवः) जाते ब्रह्मणि वर्त्तते। उत्पत्तेः प्राक् सर्वं अजम् (आसीत् इति चिन्तयति)। तेन असौ कृपणः स्मृतः ।। ३.१ ।।

उपासनाश्रितः उपासनामात्मनो मोक्ष-साधनत्वेन गतः उपासकोऽहं, ममोपास्यं ब्रह्म।

तदुपासनं कृत्वा जाते ब्रह्मणि इदानीं वर्तमानः अजं ब्रह्म शरीरपातादूर्ध्वं प्रतिपत्स्ये।

प्रागुत्पत्तेः च अजम् इदं सर्वम् अहं च।

यदात्मकोऽहं प्रागुत्पत्तेरिदानीं जातो जाते ब्रह्मणि च वर्तमान उपासनया पुनस्तदेव प्रतिपत्स्ये

इत्येवमुपासनाश्रितो धर्मः साधकः। येनैवं क्षुद्र-ब्रह्मवित्, तेन असौ कारणेन कृपणः (बृ. ३.८.१०)

दीनोऽल्पकः स्मृतः नित्याज-ब्रह्म-दर्शिभिरित्याभिप्रायः।

यद्वाचानभ्युदितं येन वागभ्युद्यते।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते (के. १.५) इत्यादि-श्रुतेस्तलवकाराणाम्।। (३.१)

सबाह्यभ्यन्तरमजमात्मानं प्रतिपत्तुमशक्नुवन् अविद्यया दीनमात्मानं मन्यमानः जातोऽहं, जाते ब्रह्मणि वर्ते,

तदुपासनाश्रितः सन्ब्रह्म प्रतिपत्स्ये इत्येवं प्रतिपन्नः कृपणो भवति यस्मात् -

**अतो वक्ष्याम्यकार्पण्यमजाति समतां गतम् ।**

**यथा न जायते किञ्चिज्जायमानं समन्ततः ।। ३.२ ।।**

अतः अकार्पण्यम् अजाति समतां गतम् वक्ष्यामि। समन्ततः जायमानं सत् यथा किञ्चित् न जायते (तथा श्रृणु)।

अतो वक्ष्यामि अकार्पण्यम् अकृपणभावमजं ब्रह्म।

तद्धि कार्पण्यास्पदम्, यत्रान्योऽन्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम् मर्त्यमसत् (छा. ७.२४.१)

वाचारम्भणं विकारो नामधेयम् (छा. ६.१.४) इत्यादिश्रुतिभ्यः।

तद्विपरीतं सबाह्याभ्यन्तरमजमकार्पण्यं भूमाख्यं ब्रह्म, यत्प्राप्याविद्या-कृत-सर्व-कार्पण्य-निवृत्तिः, तदकार्पण्यं वक्ष्यामीत्यर्थः।

तद् अजाति अविद्यमाना जातिरस्य।

समतां गतं सर्व-साम्यं गतम्। कस्मात् अवयव-वैषम्याभावात्।

यद्धि सावयवं वस्तु, तदवयवैः वैषम्यं गच्छञ्जायत इत्युच्यते।

इदं तु निरवयवत्वात् समतां गतमिति न कैश्चिदवयवैः स्फुटति। अतः अजाति अकार्पण्यम्।

समन्ततः समन्तात्, यथा न जायते किञ्चिद् अल्पमपि न स्फुटति रज्जु-सर्पवद् अविद्याकृत-दृष्ट्या जायमानं येन प्रकारेण न जायते सर्वतः अजमेव ब्रह्म भवति, तथा तं प्रकारं श्रृण्वित्यर्थः।। (३.२)

अजाति ब्रह्माकार्पण्यं वक्ष्यामीति प्रतिज्ञातम्। तत्सिद्धयर्थं हेतुं दृष्टान्तं च वक्ष्यामीत्याह -

**आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।**

**घटादिवच्च सङ्घातैर्जातावेतन्निदर्शनम् ।। ३.३ ।।**

आकाशत् हि आत्मा घटाकाशैः इव जीवैः उदितः। घटादिवत् च सङ्घातैः (आत्मा) (उदितः)। जातौ (जाति विषये) एतत् निदर्शनम् (भवति)।

आत्मा परः हि यस्माद् आकाशवत् सूक्ष्मो निरवयवः सर्वगत आकाशवद् उक्तः जीवैः क्षेत्रज्ञैः घटाकाशैः इव

घटाकाश-तुल्यैः उदितः उक्तः।

स एव आकाश-समः पर आत्मा।

अथवा घटाकाशैः यथा आकाश उदितः उत्पन्नः, तथा परो जीवात्मभिरुत्पन्नः।

जीवात्मनां परस्मादात्मन उत्पत्तिर्या श्रूयते वेदान्तेषु, सा महाकाशाद् घटाकाशोत्पत्ति-समा, न परमार्थतः इत्यभिप्रायः।

तस्मादेवाकाशाद् घटादयः सङ्घाता यथा उत्पद्यन्ते, एवम् आकाश-स्थानीयात् परमात्मनः पृथिव्यादि-भूत-सङ्घाता आध्यात्मिकाश्च कार्य-करण-लक्षणा रज्जु-सर्पवद् विकल्पिता जायन्ते।

अत उच्यते - घटादिवत् च सङ्घातैः उदित इति।

यदा मन्द-बुद्धि-प्रतिपिपादयिषया श्रुत्या आत्मनो जातिरुच्यते जीवादीनाम्, तदा जातौ उपगम्यमानायाम् एतद् निदर्शनं दृष्टान्तः यथोदिताकाशवद् इत्यादिः।। (३.३)

**घटादिषु प्रलीनेषु घटाकाशादयो यथा ।**

**आकाशे सम्प्रलीयन्ते तद्वज्जीवा इहात्मनि ।। ३.४ ।।**

घटादिषु प्रलीनेषु (सत्सु) घटाकाशादयः यथा आकाशे संप्रलीयन्ते तद्वत् जीवाः इह आत्मनि (संप्रलीयन्ते) ।। ३.४ ।।

यथा घटाद्युत्पत्त्या घटाकाशाद्युत्पत्तिः, यथा च घटादि-प्रलये घटाकाशादि-प्रलयः, तद्वद् देहादि-सङ्घातोत्पत्त्या जीवोत्पत्तिः तत्प्रलये च जीवानाम् इह आत्मनि प्रलयः, न स्वत इत्यर्थः।। (३.४)

सर्वदेहेष्वात्मैकत्वे एकस्मिन् जनन-मरण-सुखादिमत्यात्मनि सर्वात्मनां तत्सम्बन्धः क्रिया-फल-साङ्कर्यं च स्यादिति ये त्वाहुर्द्वैतिनः, तान्प्रतीदमुच्यते -

**यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते ।**

**न सर्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः ।। ३.५ ।।**

यथा एकस्मिन् घटाकाशे रजोधूमादिभिः युते सर्वे (घटाकाशाः) न संप्रयुज्यन्ते (संयुज्यन्ते) तद्वत् जीवाः सुखादिभिः (न संप्रयुज्यन्ते)।। ३.५ ।।

यथा एकस्मिन् घटाकाशे रजोधूमादिभिः युते संयुक्ते, न सर्वे घटाकाशादयः तद्रजोधूमादिभिः संयुज्यन्ते, तद्वद् जीवाः सुखादिभिः।

**विचारभाष्यम् - आत्मभेदवादनिरकरणम्**
**आक्षेपः**

ननु एक एवात्मा।

**समाधानम्**

बाढम्। ननु न श्रुतं त्वया आकाशवत् सर्वसङ्घातेष्वेक एवात्मेति

**आक्षेपः**

यद्येक एवात्मा, तर्हि सर्वत्र सुखी दुःखी च स्यात्।

**समाधानम्**
**आत्मैकत्वे साङ्ख्याक्षेपनिवृत्तिः**

न चेदं साङ्ख्य-चोद्यं सम्भवति। न हि साङ्ख्य आत्मनः सुख-दुःखादिमत्त्वमिच्छति, बुद्धि-समवायाभ्युपगमात्

सुख-दुःखादीनाम्। न चोपलब्धि-स्वरूपस्यात्मनो भेद-कल्पनायां प्रमाणमस्ति।

**आक्षेपः**
भेदाभावे प्रधानस्य पारार्थ्यानुपपत्तिरिति चेत्।

**समाधानम्**
न। प्रधान-कृतस्यार्थस्यात्मन्यसमवायात्।

यदि हि प्रधान-कृतो बन्धो मोक्षो वा अर्थः पुरुषेषु भेदेन समवैति, ततः प्रधानस्य पारार्थ्यमात्मैकत्वे नोपपद्यत

इति युक्ता पुरुष-भेद-कल्पना।

न च साङ्ख्यैः बन्धो मोक्षो वार्थः पुरुष-समवेतोऽभ्युपगम्यते।

निर्विशेषाः च चेतनमात्रा आत्मानोऽभ्युपगम्यन्ते।

अतः पुरुष-सत्तामात्र-प्रयुक्तमेव प्रधानस्य पारार्थ्यं सिद्धम्, न तु पुरुष-भेद-प्रयुक्तमिति।

अतः पुरुष-भेद-कल्पनायां न प्रधानस्य पारार्थ्यं हेतुः।

न चान्यत्पुरुष-भेद-कल्पनायां प्रमाणमस्ति साङ्ख्यानाम्।

पर-सत्ता-मात्रमेव च एतन्निमित्तीकृत्य स्वयं बध्यते मुच्यते च प्रधानम्।

परः चोपलब्धि-मात्र-सत्ता-स्वरूपेण प्रधान-प्रवृत्तौ हेतुः, न केनचिद्विशेषेणेति।

केवल-मूढतयैव पुरुष-भेद-कल्पना वेदार्थ-परित्यागश्च।

**वैशेषिकमतसमीक्षा**

ये त्वाहुर्वैशेषिकादयः इच्छादय आत्म-समवायिन इति। तदप्यसत्।

स्मृति-हेतूनां संस्काराणामप्रदेशवत्यात्मन्यसमवायात्। आत्म-मनः-संयोगाच्च स्मृत्युपत्तेः स्मृति-नियमानुपपत्तिः।

युगपद्वा सर्व-स्मृत्युत्पत्ति-प्रसङ्गः।

**मनआदिभिः आत्मसंयोगानुपपत्तिः**

न च भिन्न-जातीयानां स्पर्शादि-हीनानामात्मनां मन-आदिभिः सम्बन्धो युक्तः।

न च द्रव्याद्रूपादयो गुणाः कर्म-सामान्य-विशेष-समवाया वा भिन्नाः सन्ति परेषाम्।

यदि हि अत्यन्त-भिन्ना एव द्रव्यात् स्युः इच्छादयश्चात्मनः, तथा च सति द्रव्येण तेषां सम्बन्धानुपपत्तिः।

**आक्षेपः**

अयुत-सिद्धानां समवाय-लक्षणः सम्बन्धो न विरुध्यत इति चेत्।

**समाधानम्**

न। इच्छादिभ्योऽनित्येभ्य आत्मनो नित्यस्य पूर्व-सिद्धत्वान्नायुत-सिद्धत्वोपपत्तिः। आत्मना अयुत-सिद्धत्वे च

इच्छादीनाम् आत्म-गत-महत्त्ववद् नित्यत्व-प्रसङ्गः। स चानिष्टः। आत्मनोऽनिर्मोक्ष-प्रसङ्गात्।

समवायस्य च द्रव्यादन्यत्वे सति द्रव्येण सम्बन्धान्तरं वाच्यम्, यथा द्रव्य-गुणयोः।

**आक्षेपः**

समवायो नित्य-सम्बन्ध एवेति न वाच्यमिति चेत्।

**समाधानम्**

तथा च समवाय-सम्बन्धवतां नित्य-सम्बन्ध-प्रसङ्गात् पृथक्त्वानुपपत्तिः।

अत्यन्त-पृथक्त्वे च द्रव्यादीनां स्पर्शवदस्पर्श-द्रव्ययोः इव षष्ठ्यर्थानुपपत्तिः। इच्छाद्युपजनापायवद्-गुणवत्त्वे च आत्मनोऽनित्यत्व-प्रसङ्गः, देह-फलादिवत्। सावयवत्वं विक्रियावत्त्वं च देहादिवद् एवेति दोषावपरिहार्यौ। यथा त्वाकाशस्य अविद्याध्यारोपित-रजोधूम-मलत्वादि-दोषवत्त्वम्, तथा आत्मनः अविद्याध्यरोपित-बुद्ध्याद्युपाधिकृत-सुखदुःखादिदोषवत्त्वे बन्ध-मोक्षादयो व्यावहारिका न विरुध्यन्ते। सर्ववादिभिरविद्याकृत-व्यवहाराभ्युपगमात् परमार्थानभ्युपगमाच्च। तस्माद् आत्मभेद-परिकल्पना वृथैव तार्किकैः क्रियत इति।।

(३.५)

कथं पुनरात्मभेद-निमित्त इव व्यवहार एकस्मिन्नात्मन्यविद्याकृत उपपद्यते इत्युच्यते -

**रूपकार्यसमाख्याश्च भिद्यन्ते तत्र तत्र वै ।**

**आकाशस्य न भेदोऽस्ति तद्वज्जीवेषु निर्णयः ।। ३.६ ।।**

रूपकार्यसमाख्याश्च तत्र तत्र वै भिद्यन्ते। आकाशस्य भेदः न अस्ति। तद्वत् जीवेषु निर्णयः (भवति)।

यथा इहाकाशे एकस्मिन् घट-करकापवरकाद्याकाशानाम् अल्पत्व-महत्त्वादि-रूपाणि भिद्यन्ते, तथा कार्यम् उदकाहरण-धारण-शयनादि, समाख्याः च घटाकाशः करकाकाशः इत्याद्याः तत्कृताश्च भिन्ना दृश्यन्ते, तत्र तत्र वै व्यवहार-विषये इत्यर्थः।

सर्वोऽयमाकाशे रूपादि-भेद-कृतो व्यवहारः न परमार्थ एव। परमार्थतस्तु आकाशस्य न भेदोऽस्ति।

न च आकाश-भेद-निमित्तो व्यवहारोऽस्ति अन्तरेण परोपाधि-कृतं द्वारम्।

यथैतत्, तद्वद् देहोपाधि-भेद-कृतेषु जीवेषु घटाकाश-स्थानीयेष्वात्मसु निरूपणात्कृतः बुद्धिमद्भिः निर्णयः

निश्चयः इत्यर्थः।। (३.६)

ननु तत्र परमार्थकृत एव घटाकाशादिषु रूप-कार्यादि-भेद-व्यवहार इति। नैतदस्ति। यस्मात् -

**नाकाशस्य घटाकाशो विकारावयवौ यथा ।**

**नैवात्मनः सदा जीवो विकारावयवौ तथा ।। ३.७ ।।**

यथा घटाकाशः (महा)आकाशस्य विकारावयवौ न (भवति) तथा जीवः सदा (परम्)आत्मनः विकारावयवौ न एव (भवति)।

परमार्थाकाशस्य घटाकाशो न विकारः। यथा सुवर्णस्य रुचकादिः। यथा वा अपां फेन-बुद्बुद-हिमादिः।

नापि अवयवः। यथा वृक्षस्य शाखादिः।

न तथा आकाशस्य घटाकाशो विकारावयवौ यथा, तथा नैवात्मनः परस्य परमार्थसतो महाकाश-स्थानीयस्य

घटाकाशस्थानीयो जीवः सदा सर्वदा यथोक्त-दृष्टान्तवद् न विकारः, नापि अवयवः।

अत आत्म-भेद-कृतो व्यवहारो मृषैवेत्यर्थः।। (३.७)

यस्माद् यथा घटाकाशादि-भेद-बुद्धि-निबन्धनो रूप-कार्यादि-भेद-व्यवहारः, तथा देहोपाधि-जीव-भेद-कृतो जन्म-मरणादि-व्यवहारः, तस्मात् तत्कृत्मेव क्लेश-कर्म-फल-मलवत्त्वमात्मनः, न परमार्थत इत्येतमर्थं दृष्टान्तेन प्रतिपिपादयिषन्नाह -

**यथा भवति बालानां गगनं मलिनं मलैः ।**

**तथा भवत्यबुद्धानामात्माऽपि मलिनो मलैः ।। ३.८ ।।**

यथा बालानां गगनं मलैः मलिनं भवति तथा अबुद्धानाम् आत्मा अपि मलैः मलिनो भवति।

यथा भवति लोके बालानाम् अविवेकिनां गगनम् आकाशं घन-रजो-धूमादि-मलैः मलिनं मलवत्, न गगनं मलवद् याथात्म्य-विवेकिनाम्, तथा भवति आत्मा परः अपि - यो विज्ञाता प्रत्यक् - क्लेश-कर्म-फल-मलैः मलिनः अबुद्धानां प्रत्यगात्म-विवेक-रहितानाम्, नात्म-विवेकवताम्। न हि ऊषर-देशः तृड्वत्-प्राण्यध्यारोपितोदक-फेन-तरङ्गादिमान्। तथा नात्मा अबुधारोपित-क्लेशादि-मलैः मलिनो भवतीत्यर्थः।। (३.८)

पुनरप्युक्तमेवार्थं प्रपञ्चयति -

**मरणे सम्भवे चैव गत्यागमनयोरपि ।**

**स्थितौ सर्वशरीरेषु आकाशेनाविलक्षणः ।। ३.९ ।।**

मरणे सम्भवे च एव गत्यागमनयोः अपि सर्वशरीरेषु स्थितौ (च) (आत्मा) आकाशेन अविलक्षणः।

घटाकाश-जन्म-नाश-गमनागमन-स्थितिवत् सर्वशरीरेष्वात्मनो जन्म-मरणादिः आकाशेनाविलक्षणः प्रत्येतव्य

इत्यर्थः।। (३.९)

**सङ्घाताः स्वप्नवत्सर्वे आत्ममायाविसर्जिताः ।**

**आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते ।। ३.१० ।।**

सर्वे सङ्घाताः स्वप्नवत् आत्ममायाविसर्जिताः (भवन्ति)। आधिक्ये सर्वसाम्ये वा उपपत्तिः हि न विद्यते।

घटादि-स्थानीयास्तु देहादि-सङ्घाताः स्वप्न-दृश्य-देहादिवद् माया-विकृत-देहादिवच्च आत्म-माया-विसर्जिताः आत्मनो माया अविद्या, तया प्रत्युपस्थापिताः, न परमार्थतः सन्तीत्यर्थः।

यदि आधिक्यम् अधिक-भावः तिर्यग्देहाद्यपेक्षया देवादि-कार्य-करण-सङ्घातानाम्, यदि वा सर्वेषां समतैव, न एषां उपपत्तिः सम्भवः सद्भाव-प्रतिपादको हेतुः विद्यते नास्ति, हि यस्मात्, तस्मादविद्याकृता एव, न परमार्थतः सन्तीत्यर्थः।। (३.१०)

उत्पत्त्यादि-वर्जितस्याद्वयस्यास्यात्म-तत्त्वस्य श्रुति-प्रमाणकत्व-प्रदर्शनार्थं वाक्यानि उपन्यस्यन्ते -

**रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके ।**

**तेषामात्मा परो जीवः खं यथा सम्प्रकाशितः ।। ३.११ ।।**

ये रसादयः कोशाः (ते) हि तैत्तिरीयके व्याख्याताः (भवन्ति)। यथा खं (तथा) तेषाम् (कोशानां) आत्मा परः जीवः संप्रकाशितः।

रसादयः अन्नरसमयः प्राणमय इत्येवमादयः कोशा इव कोशाः अस्यादेः इव उत्तरोत्तरस्यापेक्षया बहिर्भावात्

पूर्वपूर्वस्य व्याख्याताः विस्पष्टमाख्याताः तैत्तिरीयके तैत्तिरीयक-शाखोपनिषद्वल्ल्याम्।

तेषां कोशानाम् आत्मा येनात्मना पञ्चापि कोशा आत्मवन्तोऽन्तरतमेन।

स हि सर्वेषां जीवन-निमित्तत्वाद् जीवः।

कोऽसौ इत्याह - परः एवात्मा यः पूर्वम् सत्यं ज्ञानमनन्तं ब्रह्म (तै. २.१) इति प्रकृतः, यस्मादात्मनः स्वप्न-मायादिवद् आकाशादि-क्रमेण रसादयः कोश-लक्षणाः सङ्घाता आत्म-माया-विसर्जिताः इत्युक्तम् (का. ३.१०)। स आत्मा अस्माभिः यथा खं तथेति सम्प्रकाशितः, आत्मा ह्याकाशवत् (का. ३.३) इत्यादि-श्लोकैः।

न तार्किक-परिकल्पितात्मवत् पुरुष-बुद्धि-प्रमाण-गम्यः इत्यभिप्रायः।। (३.११)

किञ्च -

**द्वयोर्द्वयोर्मधुज्ञाने परं ब्रह्म प्रकाशितम् ।**

**पृथिव्यामुदरे चैव यथाऽऽकाशः प्रकाशितः ।। ३.१२ ।।**

यथा पृथिव्यामुदरे चैव आकाशः प्रकाशितः (तथा) मधुज्ञाने द्वयोर्द्वयोः परं ब्रह्म प्रकाशितम् (अस्ति)।

अधिदैवतमध्यात्मं च तेजोमयोऽमृतमयः पुरुषः पृथिव्याद्यन्तर्गतो यो विज्ञाता पर एवात्मा ब्रह्म सर्वमिति द्वयोर्द्वयोः आ द्वैतक्षयात् परं ब्रह्म प्रकाशितम् (बृ. २.५.१-१४)।

क्व इत्याह - ब्रह्मविद्याख्यं मधु अमृतम् अमृतत्वं मोदन-हेतुत्वात्, तद्विज्ञायते यस्मिन्निति मधुज्ञानं मधुब्राह्मणम्, तस्मिन् इत्यर्थः। किमिव इत्याह - पृथिव्याम् उदरे चैव यथा एक आकाशः अनुमानेन प्रकाशितः लोके, तद्वद् इत्यर्थः।। (३.१२)

**जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते ।**

**नानात्वं निन्द्यते यच्च तदेवं हि समञ्जसम् ।। ३.१३ ।।**

यत् जीवात्मनोः अनन्यत्वम् अभेदेन (अभेदफलद्वारा) प्रशस्यते, नानात्वं च निन्द्यते, तत् (निन्दास्तुतिवाक्यम्) एवं (अद्वैततात्पर्यवत्वे एव) हि समञ्जसम्।

यद्युक्तितः श्रुतितश्च निर्धारितं जीवस्य परस्य चात्मनः जीवात्मनोः अनन्यत्वम् अभेदेन प्रशस्यते स्तूयते शास्त्रेण व्यासादिभिश्च। यच्च सर्व-प्राणि-साधारणं स्वाभाविकं शास्त्र-बहिष्कृतैः कुतार्किकैर्विरचितं नानात्व-दर्शनं निन्द्यते, न तु तद्द्वितीयमस्ति (बृ. ४.३.२३), द्वितीयाद्वै भयं भवति (बृ. १.४.२), उदरमन्तरं कुरुते, अथ तस्य भयं भवति (तै. २.७.१), इदं सर्वं यदयमात्मा (बृ. २.४.६, ४.५.७), मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति (क. २.१.१०) इत्यादि-वाक्यैश्च। अन्यैश्च ब्रह्मविद्भिः।

यच्चैतत्, तदेवं हि समञ्जसम् ऋज्ववबोधं न्याय्यमित्यर्थः।

यास्तु तार्किक-परिकल्पिताः कुदृष्टयः, ताः अनृज्व्यो निरूप्यमाणा न घटनां प्राञ्चन्तीत्यभिप्रायः।। (३.१३)

ननु श्रुत्यापि जीव-परमात्मनोः पृथक्त्वं यत् प्रागुत्पत्तेः उत्पत्त्यर्थोपनिषद्वाक्येभ्यः पूर्वं प्रकीर्तितं कर्मकाण्डे अनेकशः काम-भेदतः इदंकामः अदःकामः इति।

परश्च स दाधार पृथिवीं द्याम् (ऋ.वे. १०.१२१.१) इत्यादि-मन्त्र-वर्णैः। तत्र कथं कर्म-ज्ञानकाण्ड-वाक्य-विरोधे ज्ञान-काण्ड-वाक्यार्थस्यैवैकत्वस्य सामञ्जस्यमवधार्यत इति। अत्रोच्यते -

**जीवात्मनोः पृथक्त्वं यत्प्रागुत्पत्तेः प्रकीर्त्तितम्।**

**भविष्यद्-वृत्त्या गौणं तन्मुख्यत्वं हि न युज्यते।। ३.१४।।**

उत्पत्तेः प्राक् यत् जीवात्मनोः पृथक्त्वं प्रकीर्तितम् तत् भविष्यद्वृत्त्या गौणं (भवति) मुख्यत्वं हि न युज्यते।
उत्पत्तेः प्राक् (अपृथक्त्वं) प्रकीर्तितम्। तन्मध्ये यत् जीवात्मनोः (पृथक्त्वं उक्तम्) तत् भविष्यद्वृत्त्या गौणं (भवति)। (तत्) मुख्यत्वं हि न युज्यते।

यतो वा इमानि भूतानि जायन्ते (तै. ३.१) यथाग्नेः क्षुद्रा विस्फुलिङ्गाः (बृ. २.१.२०) तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः (तै. २.१.२) तदैक्षत (छा. ६.२.३) तत्तेजोऽसृजत (छा. ६.२.३) इत्याद्युत्पत्त्यर्थोपनिषद्वाक्येभ्यः प्राक् पृथक्त्वं कर्मकाण्डे प्रकीर्तितं यत्, तन्न परमार्थम्।

किं तर्हि गौणम्। महाकाश-घटाकाशादि-भेदवत्। यथा ओदनं पचतीति भविष्यद्वृत्त्या, तद्वत्।

न हि भेद-वाक्यानां कदाचिदपि मुख्य-भेदार्थत्वमुपपद्यते।

स्वाभाविकाविद्यावत्प्राणि-भेद-दृष्ट्यनुवादित्वाद् आत्म-भेद-वाक्यानाम्।

इह च उपनिषत्सु उत्पत्ति-प्रलयादि-वाक्यैर्जीव-परमात्मनोः एकत्वमेव प्रतिपिपादयिषितम् तत्त्वमसि (छा. ६.८-१६) अन्योऽसावन्योऽहम् अस्मीति न स वेद (बृ. १.४.१०) इत्यादिभिः।

अत उपनिषत्स्वेकत्वं श्रुत्या प्रतिपिपादयिषितं भविष्यतीति भाविनीम् एकवृत्तिमाश्रित्य लोके भेद-दृष्ट्यनुवादो गौण एवेत्यभिप्रायः।

अथवा, तदैक्षत (छा. ६.२.३) तत्तेजोऽसृजत (छा. ६.२.३) इत्याद्युत्पत्तेः प्राक् एकमेवाद्वितीयम् (छा. ६.२.२) इत्येकत्वं प्रकीर्तितम्।

तदेव च तत्सत्यं स आत्मा, तत्त्वमसि (छा. ६.८-१६) इत्येकत्वं भविष्यतीति तां भविष्यद्वृत्तिमपेक्ष्य यज्जीवात्मनोः पृथक्त्वं यत्र क्वचिद्वाक्ये गम्यमानम्, तद्गौणम्। यथा ओदनं पचतीति, तद्वत्।। (३.१४)

**आक्षेपः**

ननु यद्युत्पत्तेः प्रागजं सर्वम् एकमेवाद्वितीयम्, तथापि उत्पत्तेरूर्ध्वं जातमिदं सर्वं जीवाः च भिन्ना इति।

**समाधानम्**

मैवम्। अन्यार्थत्वादुत्पत्ति-श्रुतीनाम्। पूर्वमपि परिहृत एवायं दोषः, स्वप्नवद् आत्म-माया-विसर्जिताः (मा.का.

३.१०) सङ्घाताः घटाकाशोत्पत्ति-भेदादिवद् जीवानाम् उत्पत्ति-भेदादिः इति।

इत एव उत्पत्ति-भेदादि-श्रुतिभ्य आकृष्य इह पुनरुत्पत्ति-श्रुतीनामैदंपर्य-प्रतिपिपादयिषया उपन्यासः -

**मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।**

**उपायः सोऽवताराय नास्ति भेदः कथञ्चन ।। ३.१५ ।।**

या सृष्टिः मृल्लोहविस्फुलिङ्गाद्यैः अन्यथा (अन्यथा) चोदिता सः (अद्वैतज्ञान)अवताराय उपायः (भवति)। भेदः कथञ्चन नास्ति ।

मृल्लोहविस्फुलिङ्गादि-दृष्टान्तोपन्यासैः सृष्टिः या च उदिता प्रकाशिता कल्पिता अन्यथा अन्यथा च, सः सर्वः

सृष्टि-प्रकारो जीव-परमात्मैकत्व-बुद्ध्यवताराय उपायः अस्माकम्।

यथा प्राण-संवादे वागाद्यासुर-पाप्म-वेधाद्याख्यायिका कल्पिता प्राण-वैशिष्ट्य-बोधावताराय।

**आक्षेपः**

तदप्यसिद्धमिति चेत्।

**समाधानम्**

न, शाखाभेदेष्वन्यथान्यथा च प्राणादि-संवाद-श्रवणात्। यदि हि संवादः परमार्थ एवाभूत्, एकरूप एव संवादः

सर्वशाखास्वश्रोष्यत्। विरुद्धानेक-प्रकारेण नाश्रोष्यत्। श्रूयते तु।

तस्मान्न तादर्थ्यं संवाद-श्रुतीनाम्। तथोत्पत्ति-वाक्यानि प्रत्येतव्यानि।

**आक्षेपः**

कल्प-सर्ग-भेदात् संवाद-श्रुतीनामुत्पत्ति-श्रुतीनां च प्रतिसर्गमन्यथात्वमिति चेत्।

**समाधानम्**

न, निष्प्रयोजनत्वाद् यथोक्त-बुद्ध्यवतार-प्रयोजन-व्यतिरेकेण।

न हि अन्य-प्रयोजनवत्त्वं संवादोत्पत्ति-श्रुतीनां शक्यं कल्पयितुम्।

**आक्षेपः**

तथात्व-प्रतिपत्तये ध्यानार्थमिति चेत्।

**समाधानम्**

न, कलहोत्पत्ति-प्रलयानां प्रतिपत्तेरनिष्टत्वात्। तस्मादुत्पत्त्यादि-श्रुतय आत्मैकत्व-बुद्ध्यवतारायैव,

नान्यार्थाः कल्पयितुं युक्ताः। अतो नास्ति उत्पत्त्यादि-कृतो भेदः कथञ्चन।। (३.१५)

यदि पर एवात्मा नित्य-शुद्ध-बुद्ध-मुक्त-स्वभाव एकः परमार्थतः सन् एकमेवाद्वितीयम् (छा. ६.२.२) इत्यादिश्रुतिभ्यः, असदन्यत्, किमर्थेयम् उपासनोपदिष्टा आत्मा वा अरे द्रष्टव्यः (बृ. २.४.५) य आत्मापहतपाप्मा (छा. ८.७.१) स क्रतुं कुर्वीत (छा. ३.१४.१) आत्मेत्येवोपासीत (बृ. १.४.७) इत्यादि-श्रुतिभ्यः, कर्माणि चाग्निहोत्रादीनि शृणु तत्र कारणम् ॥

**आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः ।**

**उपासनोपदिष्टेयं तदर्थमनुकम्पया ।। ३.१६ ।।**

हीनमध्यमोत्कृष्टदृष्टयः (इमे) आश्रमाः त्रिविधाः (भवन्ति)। तदर्थम् अनुकम्पया (श्रुत्या) इयम् उपासना उपदिष्टा।

आश्रमाः आश्रमिणोऽधिकृताः वर्णिनश्च मार्गगाः। आश्रम-शब्दस्य प्रदर्शनार्थत्वात्, त्रिविधाः।

कथम् हीनमध्यमोत्कृष्टदृष्टयः हीना निकृष्टा, मध्यमा, उत्कृष्टा च दृष्टिः दर्शनं सामर्थ्यं येषां ते।

मन्द-मध्यमोत्तम-बुद्धि-सामर्थ्योपेता इत्यर्थः। उपासना उपदिष्टा इयं तदर्थं मन्द-मध्यम-दृष्ट्याश्रमाद्यर्थं कर्माणि च। न च आत्मैक एवाद्वितीय इति निश्चितोत्तम-दृष्ट्यर्थम्।

दयालुना वेदेनानुकम्पया सन्मार्गगाः सन्तः कथमिमामुत्तमाम् एकत्व-दृष्टिं प्राप्नुयुरिति।

यन्मनसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते (के. १.६) तत्त्वमसि (छा. ६.७-१६) आत्मैवेदं सर्वम् (छा. ७.२५.२) इत्यादिश्रुतिभ्यः।। (३.१६)

शास्त्रोपपत्तिभ्यामवधारितत्वाद् अद्वयात्म-दर्शनं सम्यग्दर्शनम्, तद्बाह्यत्वाद् मिथ्या-दर्शनमन्यत्। इतश्च मिथ्यादर्शनं द्वैतिनां रागद्वेषादि-दोषास्पदत्वात्। कथम्

**स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम् ।**

**परस्परं विरुध्यन्ते तैरयं न विरुध्यते ।। ३.१७ ।।**

स्वसिद्धान्तव्यवस्थासु द्वैतिनो दृढम् निश्चिताः (भवन्ति)। ते (द्वैतिनः) परस्परं विरुध्यन्ते। तैः (द्वैतिभिः) अयं (अद्वैती) न विरुध्यते ।

स्वसिद्धान्त-व्यवस्थासु स्वसिद्धान्त-रचना-नियमेषु कपिल-कणाद-बुद्धार्हतादि-दृष्ट्यनुसारिणो द्वैतिनो निश्चिताः। एवमेवैष परमार्थो नान्यथेति, तत्र तत्रानुरक्ताः प्रतिपक्षं चात्मनः पश्यन्तस्तं द्विषन्त इत्येवं रागद्वेषोपेताः स्व-सिद्धान्त-दर्शन-निमित्तमेव परस्परम् अन्योन्यं विरुध्यन्ते। तैः अन्योन्य-विरोधिभिरस्मदीयः अयं वैदिकः सर्वानन्यत्वाद् आत्मैकत्व-दर्शन-पक्षो न विरुध्यते, यथा स्वहस्त-पादादिभिः।

एवं रागद्वेषादि-दोषानास्पदत्वादात्मैकत्व-बुद्धिरेव सम्यग्दर्शनम् इत्यभिप्रायः।। (३.१७)

केन हेतुना तैर्न विरुध्यत इत्युच्यते -

**अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते ।**

**तेषामुभयथा द्वैतं तेनायं न विरुध्यते ।। ३.१८ ।।**

अद्वैतं हि परमार्थः (इति) (श्रुत्या) उच्यते। द्वैतं तद्भेदः (उच्यते)। तेषामुभयथा द्वैतं (भवति)। तेन (द्वैतस्य भ्रान्तिमूलत्वेन) अयं (अजातिवादः) न विरुध्यते ।

अद्वैतं परमार्थः। हि यस्माद् द्वैतं नानात्वं तस्याद्वैतस्य भेदः तद्भेदः, तस्य कार्यमित्यर्थः।

एकमेवाद्वितीयम् तत्तेजोऽसृजत (छा. ६.२.२-३) इति श्रुतेः। उपपत्तेश्च।

स्वचित्त-स्पन्दनाभावे समाधौ मूर्छायां सुषुप्तौ च अभावात्। अतः तद्भेद उच्यते द्वैतम्।

द्वैतिनां तु तेषां परमार्थतश्च अपरमार्थतश्च उभयथा अपि द्वैतम् एव।

यदि च तेषां भ्रान्तानां द्वैत-दृष्टिः अस्माकमद्वैत-दृष्टिरभ्रान्तानाम्, तेनायं हेतुना अस्मत्पक्षो न विरुध्यते तैः।

इन्द्रो मायाभिः पुरुरूप ईयते (बृ. २.५.१९) न तु तद्द्वितीयमस्ति (बृ. ४.३.२३) इति श्रुतेः।

यथा मत्त-गजारूढः उन्मत्तं भूमिष्ठं प्रति गजारूढोऽहं गजं वाहय मां प्रति इति ब्रुवाणमपि तं प्रति न

वाहयत्यविरोध-बुद्ध्या, तद्वत्।

ततः परमार्थतो ब्रह्मविद् आत्मैव द्वैतिनाम्।

तेनायं हेतुना अस्मत्पक्षो न विरुध्यते तैः।। (३.१८)

द्वैतमद्वैतभेदः इत्युक्ते द्वैतमप्यद्वैतवत् परमार्थसदिति स्यात् कस्यचिदाशङ्का इत्यत आह -

**मायया भिद्यते ह्येतन्नान्यथाऽजं कथञ्चन ।**

**तत्त्वतो भिद्यमाने हि मर्त्यताममृतं व्रजेत् ।। ३.१९ ।।**

एतत् हि मायया भिद्यते। अन्यथा अजं कथञ्चन न (भिद्यते)। तत्त्वतो भिद्यमाने हि अमृतं मर्त्यताम् व्रजेत्।

यत्परमार्थसदद्वैतं मायया भिद्यते ह्येतत् तैमिरिकानेक-चन्द्रवद् रज्जुः सर्प-धारादिभिः भेदैः इव। न परमार्थतः, निरवयवत्वादात्मनः। सावयवं ह्यवयवान्यथात्वेन भिद्यते। यथा मृद् घटादि-भेदैः। तस्मान्निरवयवम् अजं नान्यथा कथञ्चन केनचिदपि प्रकारेण न भिद्यत इत्यभिप्रायः। तत्त्वतो भिद्यमाने हि अमृतम् अजमद्वयं स्वभावतः सत् मर्त्यतां व्रजेत्। यथा अग्निः शीतताम्। तच्चानिष्टं स्वभाव-वैपरीत्य-गमनम्, सर्व-प्रमाण-विरोधात्। अजमव्ययमात्म-तत्त्वं माययैव भिद्यते, न परमार्थतः। तस्मान्न परमार्थसद् द्वैतम्।। (३.१९)

**अजातस्यैव भावस्य जातिमिच्छन्ति वादिनः ।**

**अजातो ह्यमृतो भावो मर्त्यतां कथमेष्यति ।। ३.२० ।।**

वादिनः अजातस्यैव भावस्य जातिमिच्छन्ति। अजातो अमृतो हि भावः कथं मर्त्यताम् एष्यति।

ये तु पुनः केचिदुपनिषव्द्याख्यातारो ब्रह्म-वादिनो वावदूकाः अजातस्यैव आत्म-तत्त्वस्यामृतस्य स्वभावतो जातिम् उत्पत्तिम् इच्छन्ति परमार्थत एव, तेषां जातं चेत्, तदेव मर्त्यतामेष्यत्यवश्यम्।

स च अजातो ह्यमृतो भावः स्वभावतः सन्नात्मा कथं मर्त्यतामेष्यति न कथञ्चन मर्त्यत्वं स्वभाव-वैपरीत्यमेष्यतीत्यर्थः।। (३.२०)

**न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा ।**

**प्रकृतेरन्यथाभावो न कथञ्चिद् भविष्यति ।। ३.२१ ।।**

अमृतं मर्त्यं न भवति। तथा मर्त्यममृतं न (भवति)। प्रकृतेरन्यथाभावः कथञ्चिद् न भविष्यति।। २१।।

यस्माद् न भवति अमृतं मर्त्यं लोके नापि मर्त्यममृतं तथा, ततः प्रकृतेः स्वभावस्य अन्यथाभावः स्वतः प्रच्युतिः न कथञ्चिद् भविष्यति। अग्नेः इव औष्ण्यस्य।। (३.२१)

**स्वभावेनामृतो यस्य भावो गच्छति मर्त्यताम् ।**

**कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ।। ३.२२ ।।**

यस्य (वादिनः) स्वभावेन अमृतः भावः मर्त्यतां गच्छति तस्य अमृतः कृतकेन (हेतुना) कथं निश्चलः स्थास्यति (कथञ्चिदपि न स्थास्यति)।। २२।।

यस्य पुनर्वादिनः स्वभावेन अमृतो भावः मर्त्यतां गच्छति परमार्थतो जायते, तस्य प्रागुत्पत्तेः स भावः

स्वभावतोऽमृत इति प्रतिज्ञा मृषैव।

कथं तर्हि कृतकेन अमृतः तस्य स्वभावः कृतकेनामृतः सः कथं स्थास्यति निश्चलः अमृत-स्वभावतया न

कथञ्चित् स्थास्यति।

आत्म-जाति-वादिनः सर्वथा अजं नाम नास्त्येव। सर्वम् एतन्मर्त्यम्। अतः अनिर्मोक्ष-प्रसङ्ग इत्यभिप्रायः।।

(३.२२)

**आक्षेपः**

नन्वजातिवादिनः सृष्टि-प्रतिपादिका श्रुतिर्न सङ्गच्छते प्रामाण्यम्।

**समाधानम्**

बाढम्। विद्यते सृष्टि-प्रतिपादिका श्रुतिः। सा त्वन्यपरा। उपायः सोऽवताराय (का. ३.१५) इत्यवोचाम।

इदानीमुक्तेऽपि परिहारे पुनः चोद्य-परिहारौ विवक्षितार्थं प्रति सृष्टि-श्रुत्यक्षराणामानुलोम्य-विरोधाशङ्का-मात्र-

परिहारार्थौ -

**भूततोऽभूततो वापि सृज्यमाने समा श्रुतिः ।**

**निश्चितं युक्तियुक्तं च यत्तद् भवति नेतरत् ।। ३.२३ ।।**

भूततोऽभूततो वापि सृज्यमाने (सति) श्रुतिः समा (भवति)। यत् निश्चितं युक्तियुक्तं च (भवति) तत् (तात्पर्ययुक्तम्) भवति। इतरत् (तात्पर्यं) न (भवति)।

भूततः परमार्थतः सृज्यमाने वस्तुनि, अभूततः मायया वा मायाविना इव सृज्यमाने वस्तुनि समा तुल्या सृष्टि-श्रुतिः।

**आक्षेपः**

ननु गौण-मुख्ययोर्मुख्ये शब्दार्थ-प्रतिपत्तिर्युक्ता।

**समाधानम्**

न, अन्यथा सृष्टेः अप्रसिद्धत्वात्, निष्प्रयोजनत्वाच्च इत्यवोचाम। अविद्या-सृष्टि-विषयैव सर्वा गौणी मुख्या च सृष्टिः। न परमार्थतः। सबाह्याभ्यन्तरो ह्यजः (मु. २.१.२) इति श्रुतेः।

तस्मात् श्रुत्या निश्चितं यत् एकमेवाद्वितीयमजममृतमिति, युक्तियुक्तं च युक्त्या च सम्पन्नम्, तदेवेत्यवोचाम पूर्वैः ग्रन्थैः। तद् एव श्रुत्यर्थो भवति, नेतरत् कदाचिदपि।। (३.२३)

कथं श्रुतिनिश्चय इत्याह -

**नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि ।**

**अजायमानो बहुधा जायते मायया तु सः ।। ३.२४ ।।**

नेह नानेति च इन्द्रो मायाभिरित्यपि अजायमानो बहुधा (इति च) आम्नायात् सः तु मायया जायते।

यदि हि भूतत एव सृष्टिः स्यात्, ततः सत्यमेव नाना वस्त्विति तदभाव-प्रदर्शनार्थ आम्नायो न स्यात्।

अस्ति च नेह नानास्ति किञ्चन (कठ. २.१.११) इत्यादिः आम्नायो द्वैतभाव-प्रतिषेधार्थः।

तस्मादात्मैकत्व-प्रतिपत्त्यर्था कल्पिता सृष्टिरभूतैव प्राण-संवादवत्।

इन्द्रो मायाभिः (ऋ.वेद. ६.४७.१८, बृ. २.५.१९) इत्यभूतार्थ-प्रतिपादकेन माया-शब्देन व्यपदेशात्।

**आक्षेपः**

ननु प्रज्ञावचनो मायाशब्दः।

**समाधानम्**

सत्यम्, इन्द्रिय-प्रज्ञाया अविद्यामयत्वेन मायात्वाभ्युपगमाददोषः।

मायाभिः इन्द्रिय-प्रज्ञाभिरविद्या-रूपाभिरित्यर्थः।

अजायमानो बहुधा विजायते(यजु. तै.आ. ३.१३.१) इति श्रुतेः।

तस्माद् मायया एव जायते तु सः। तु-शब्दोऽवधारणार्थः माययैवेति।

न हि अजायमानत्वं बहुधा जन्म च एकत्र सम्भवति। अग्नौ इव शैत्यमौष्ण्यं च।

फलवत्त्वाच्च आत्मैकत्व-दर्शनमेव श्रुतिनिश्चितोऽर्थः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः(ई. ७)

इत्यादि-मन्त्रवर्णात्। मृत्योः स मृत्युमाप्नोति(कठ. २.१.१०) इति निन्दितत्वाच्च सृष्ट्यादि-भेद-दृष्टेः।। (३.२४)

## सम्भूतेरपवादाच्च सम्भवः प्रतिषिध्यते ।

## को न्वेनं जनयेदिति कारणं प्रतिषिध्यते ।। ३.२५ ।।

सम्भूतेः अपवादात् च सम्भवः प्रतिषिध्यते। कः नु एनं जनयेत् इति कारणं प्रतिषिध्यते।

अन्धं तमः प्रविशन्ति ये सम्भूतिमुपासते(ई. १२) इति सम्भूतेः उपास्यत्वापवादात् सम्भवः प्रतिषिध्यते।

न हि परमार्थ-सम्भूतायां सम्भूतौ तदपवादः उपपद्यते।

**आक्षेपः**
ननु विनाशेन सम्भूतेः समुच्चय-विधानार्थः सम्भूत्यपवादः।

यथा अन्धं तमः प्रविशन्ति येऽविद्यामुपासते(ई. ९) इति।

**समाधानम्**
सत्यमेव।

देवता-दर्शनस्य सम्भूति-विषयस्य विनाश-शब्द-वाच्यस्य कर्मणः समुच्चय-विधानार्थः सम्भूत्यपवादः।

तथापि विनाशाख्यस्य कर्मणः स्वाभाविकाज्ञान-प्रवृत्ति-रूपस्य मृत्योरतितरणार्थत्ववत् देवता-दर्शन-कर्म-समुच्चयस्य पुरुष-संस्कारार्थस्य कर्म-फल-राग-प्रवृत्ति-रूपस्य साध्य-साधनैषणा-द्वय-लक्षणस्य मृत्योरतितरणार्थत्वम्। एवं हि एषणाद्वय-रूपान्मृत्योरशुद्धेर्वियुक्तः पुरुषः संस्कृतः स्यात्।

अतो मृत्योरतितरणार्था देवता-दर्शन-कर्म-समुच्चय-लक्षणा ह्यविद्या।

एवमेव एषणा-लक्षणाद् अविद्याया मृत्योरतितीर्णस्य विरक्तस्य उपनिषच्छास्त्रार्थालोचन-परस्य नान्तरीयकी परमात्मैकत्व-विद्योत्पत्तिरिति पूर्व-भाविनीम् अविद्यामपेक्ष्य पश्चाद्भाविनी ब्रह्मविद्या अमृतत्व-साधना एकेन पुरुषेण सम्बध्यमाना अविद्यया समुच्चीयत इत्युच्यते। अतः अन्यार्थत्वाद् अमृतत्व-साधनं ब्रह्मविद्यामपेक्ष्य,

निन्दार्थ एव भवति सम्भूत्यपवादः, यद्यप्यशुद्धि-वियोग-हेतुः अतन्निष्ठत्वात्।

अत एव सम्भूतेरपवादात् सम्भूतेरापेक्षिकमेव सत्त्वमिति।

परमार्थसदात्मैकत्वमपेक्ष्य अमृताख्यः सम्भवः प्रतिषिध्यते।

एवं माया-निर्मितस्यैव जीवस्य अविद्यया प्रत्युपस्थापितस्य अविद्या-नाशे स्वभाव-रूपत्वात् परमार्थतः को न्वेनं जनयेत् न हि रज्ज्वामविद्याध्यारोपितं सर्पं पुनर्विवेकतो नष्टं जनयेत्कश्चित्।

तथा न कश्चिदेनं जनयेदिति। को न्वित्याक्षेपार्थत्वात् कारणं प्रतिषिध्यते।

अविद्योद्भूतस्य नष्टस्य जनयितृ कारणं न किञ्चिदस्ति इत्यभिप्रायः।

नायं कुतश्चिन्न बभूव कश्चित् (कठ. १.२.१८) इति श्रुतेः।। (३.२५)

**स एष नेति नेतीति व्याख्यातं निह्नुते यतः ।**

**सर्वमग्राह्यभावेन हेतुनाऽजं प्रकाशते ।। ३.२६ ।।**

यतः स एषः नेति नतिइति अग्राह्यभावेन हेतुना व्याख्यातं सर्वम् निह्नुते (ततः) अजं प्रकाशते।

सर्व-विशेष-प्रतिषेधेन अथात आदेशो नेति नेति (बृ. २.३.६) इति प्रतिपादितस्यात्मनो दुर्बोधत्वं मन्यमाना श्रुतिः पुनः पुनरुपायान्तरत्वेन तस्यैव प्रतिपिपादयिषया यद्यद् व्याख्यातं तत्सर्वं निह्नुते। ग्राह्यं जनिमद्बुद्धि-विषयम् अपलपति। अर्थात् स एष नेति नेति (बृ. ३.९.२६) इति आत्मनोऽदृश्यतां दर्शयन्ती श्रुतिः उपायस्य उपेय-निष्ठतामजानत उपायत्वेन व्याख्यातस्य उपेयवद् ग्राह्यता मा भूदिति अग्राह्य-भावेन हेतुना कारणेन निह्नुत इत्यर्थः। ततश्च एवम् उपायस्योपेय-निष्ठतामेव जानत उपेयस्य च नित्यैकरूपत्वमिति तस्य सबाह्याभ्यन्तरम् अजम् आत्मतत्त्वं प्रकाशते स्वयमेव।। (३.२६)

एवं हि श्रुति-वाक्य-शतैः सबाह्याभ्यन्तरमजमात्म-तत्त्वमद्वयं न ततोऽन्यदस्तीति निश्चितमेतत्।

युक्त्या चाधुनैतदेव पुनर्निर्धार्यत इत्याह -

**सतो हि मायया जन्म युज्यते न तु तत्त्वतः ।**

**तत्त्वतो जायते यस्य जातं तस्य हि जायते ।। ३.२७ ।।**

सतः हि मायया जन्म युज्यते। तत्त्वतः न तु (जन्म युज्यते)। यस्य तत्त्वतो जायते तस्य जातं हि जायते।

**आक्षेपः**
तत्रैतत्स्यात् - सदा अग्राह्यमेव चेद् असदेवात्म-तत्त्वमिति।

**समाधानम्**
तन्न, कार्य-ग्रहणात्। यथा सतो मायाविनः मायया जन्म-कार्यम्, एवं जगतो जन्म-कार्यं गृह्यमाणं मायाविनम्

इव परमार्थसन्तमात्मानं जगज्जन्म मायास्पदम् अवगमयति।

यस्मात् सतो हि विद्यमानात्कारणाद् माया-निर्मितस्य हस्त्यादि-कार्यस्य इव जगज्जन्म युज्यते, नासतः कारणात्। न तु तत्त्वतः एव आत्मनो जन्म युज्यते।

अथवा, सतः विद्यमानस्य वस्तुनो रज्ज्वादेः सर्पादिवद् मायया जन्म युज्यते न तु तत्त्वतो यथा, तथा अग्राह्यस्यापि सत एवात्मनो रज्जुसर्पवद् जगद्रूपेण मायया जन्म युज्यते।

न तु तत्त्वतः एवाजस्यात्मनो जन्म।

यस्य पुनः परमार्थ-सद् अजमात्म-तत्त्वं जगद्रूपेण जायते वादिनः, न हि तस्य अजं जायत इति शक्यं वक्तुम्, विरोधात्। ततः तस्य अर्थाद् जातं जायते इत्यापन्नम्।

ततश्च अनवस्था जाताज्जायमानत्वेन। तस्मादजमेकमेवात्म-तत्त्वमिति सिद्धम्।। (३.२७)

**असतो मायया जन्म तत्त्वतो नैव युज्यते ।**

**वन्ध्यापुत्रो न तत्त्वेन मायया वाऽपि जायते ।। ३.२८ ।।**

असतः तत्त्वतो मायया (वा) जन्म नैव युज्यते । वन्ध्यापुत्रो तत्त्वेन मायया वा अपि न जायते ।

असद्वादिनाम् असतो भावस्य मायया तत्त्वतो वा न कथञ्चन जन्म युज्यते, अदृष्टत्वात्।

न हि वन्ध्यापुत्रो मायया तत्त्वतो वा जायते।

तस्मादत्रासद्वादो दूरत एवानुपपन्न इत्यर्थः।। (३.२८)

कथं पुनः सतो माययैव जन्म इत्युच्यते -

**यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः ।**

**तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः ।। ३.२९ ।।**

यथा स्वप्ने मनः मायया द्वयाभासं स्पन्दते तथा जाग्रद् (जाग्रति) मनः मायया द्वयाभासं स्पन्दते ।

यथा रज्ज्वां विकल्पितः सर्पो रज्जु-रूपेणावेक्ष्यमाणः सन्, एवं मनः परमात्म- विज्ञप्त्याऽऽत्म-रूपेणावेक्ष्यमाणं सद् ग्राह्य-ग्राहक-रूपेण द्वयाभासं स्पन्दते स्वप्ने मायया, रज्ज्वाम् इव सर्पः।

तथा तद्वदेव जाग्रद् जागरिते स्पन्दते मायया मनः। स्पन्दत इव इत्यर्थः।। (३.२९)

**अद्वयं च द्वयाभासं मनः स्वप्ने न संशयः ।**

**अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः ।। ३.३० ।।**

अद्वयं मनः (एव) स्वप्ने द्वयाभासम् (भवति)। न संशयः । तथा अद्वयं (मनः एव) जाग्रत् द्वयाभासं (भवति)। न संशयः । (अथवा)

स्वप्ने द्वयाभासं मनश्च अद्वयं चैतन्यमेव न संशयः, तथा जाग्रत् द्वयाभासं मनः अद्वयं चैतन्यमेव न संशयः।

रज्जु-रूपेण सर्प इव परमार्थत आत्म-रूपेण अद्वयं सद् द्वयाभासं मनः स्वप्ने, न संशयः।

न हि स्वप्ने हस्त्यादि ग्राह्यं तद्ग्राहकं वा चक्षुरादि द्वयं विज्ञान-व्यतिरेकेणास्ति।

जाग्रदपि तथा एव इत्यर्थः। परमार्थ-सद्विज्ञान-मात्राविशेषात्।। (३.३०)

रज्जु-सर्पवद् विकल्पनारूपं द्वैत-रूपेण मन एवेत्युक्तम्।

तत्र किं प्रमाणमिति, अन्वय-व्यतिरके-लक्षणमनुमानमाह। कथम् -

**मनोदृश्यमिदं द्वैतं यत्किञ्चित्सचराचरम् ।**

**मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते ।। ३.३१ ।।**

यत्किञ्चित् सचराचरम् (तत्) इदं द्वैतं मनोदृश्यम् (भवति)। मनसः हि अमनीभावे (सति) द्वैतं न एव उपलभ्यते।

तेन हि मनसा विकल्प्यमानेन दृश्यं मनोदृश्यम् इदं द्वैतं सर्वं मनः इति प्रतिज्ञा।

तद्भावे भावात् तदभावे चाभावात्। मनसो हि अमनीभावे निरुद्धे विवेक-दर्शनाभ्यास-वैराग्याभ्यां रज्ज्वाम् इव सर्पे लयं गते वा सुषुप्ते द्वैतं नैवोपलभ्यते इति अभावात्सिद्धं द्वैतस्यासत्त्वमित्यर्थः।। (३.३१)

कथं पुनरयममनीभावः इत्युच्यते -

**आत्मसत्यानुबोधेन न सङ्कल्पयते यदा ।**

**अमनस्तां तदा याति ग्राह्याभावे तदग्रहम् ।। ३.३२ ।।**

यदा आत्मसत्यानुबोधेन (मनः) न सङ्कल्पयते तदा अमनस्तां याति। ग्राह्याभावे तद् (मनः) अग्रहम्।

आत्मैव सत्यमात्मसत्यम्। मृत्तिकावत्, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (छा. ६.१.४) इति श्रुतेः। तस्य शास्त्राचार्योपदेशमन्ववबोधः आत्मसत्यानुबोधः।

तेन सङ्कल्प्याभावतया न सङ्कल्पयते, दाह्याभावे ज्वलनम् इव अग्नेः, यदा यस्मिन्काले, तदा तस्मिन्काले अमनस्ताम् अमनीभावं याति। ग्राह्याभावे तद् मनः अग्रहं ग्रहण-विकल्पना-वर्जितमित्यर्थः।। (३.३२)

यद्यसदिदं द्वैतम्, केन स्वमजमात्म-तत्त्वं विबुध्यते इत्युच्यते -

**अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते ।**

**ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते ।। ३.३३ ।।**

(ब्रह्मविदः) अकल्पकम् अजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते। अजं नित्यम् ब्रह्म ज्ञेयम् । (तेन) अजेन (ज्ञानेन) अजं (ब्रह्म) विबुध्यते।

अकल्पकं सर्वकल्पना-वर्जितम्। अत एव अजं ज्ञानं ज्ञप्तिमात्रं ज्ञेयेन परमार्थ-सता ब्रह्मणा अभिन्नं प्रचक्षते कथयन्ति ब्रह्मविदः। न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते (बृ. ४.३.३०) अग्न्युष्णवत्, विज्ञानमानन्दं ब्रह्म (बृ. ३.९.२८) सत्यं ज्ञानमनन्तं ब्रह्म (तै. २.१.१) इत्यादि-श्रुतिभ्यः। तस्यैव विशेषणम् - ब्रह्म ज्ञेयं यस्य, स्वस्य तदिदं ब्रह्मज्ञेयम् औष्ण्यस्य इव अग्निवद् अभिन्नम्। तेन आत्म-स्वरूपेण अजेन ज्ञानेन अजं ज्ञेयमात्म-तत्वं स्वयमेव विबुध्यते अवगच्छति। नित्य-प्रकाश-स्वरूप इव सविता। नित्य-विज्ञानैकरस-घनत्वान्न ज्ञानान्तरमपेक्षत इत्यर्थः।। (३.३३)

आत्म-सत्यानुबोधेन सङ्कल्पमकुर्वद् बाह्य-विषयाभावे निरिन्धनाग्निवत् प्रशान्तं सद् निगृहीतं निरुद्धं मनो भवतीत्युक्तम्। एवं च मनसो ह्यमनीभावे द्वैताभावश्च उक्तः। तस्यैवं -

**निगृहीतस्य मनसो निर्विकल्पस्य धीमतः ।**

**प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः ।। ३.३४ ।।**

निगृहीतस्य निर्विकल्पस्य धीमतः मनसः सः प्रचारः तु विज्ञेयः। सुषुप्ते (सः प्रचारः) अन्यः, न तत्समः।

निगृहीतस्य निरुद्धस्य मनसः निर्विकल्पस्य सर्वकल्पना-वर्जितस्य धीमतः विवेकवतः प्रचरणं प्रचारः यः,

सः तु प्रचारः विशेषेण ज्ञेयो विज्ञेयो योगिभिः।

ननु सर्व-प्रत्ययाभावे यादृशः सुषुप्तिस्थस्य मनसः प्रचारः, तादृश एव निरुद्धस्यापि, प्रत्ययाभावाविशेषात्।

किं तत्र विज्ञेयमिति। अत्रोच्यते - नैवम्। यस्मात् सुषुप्ते अन्यः प्रचारः।

अविद्या-मोह-तमोग्रस्तस्य अन्तर्लीनानेकानर्थ-प्रवृत्ति-बीज-वासनावतो मनसः आत्म-सत्यानुबोध-हुताश-

विप्लुष्टाविद्याद्यनर्थ-प्रवृत्ति-बीजस्य निरुद्धस्य अन्यः एव प्रशान्त-सर्वक्लेश-रजसः स्वतन्त्रः प्रचारः।

अतो न तत्समः। तस्माद्युक्तः स विज्ञातुमित्यभिप्रायः।। (३.३४)

प्रचार-भेदे हेतुमाह -

**लीयते हि सुषुप्ते तन्निगृहीतं न लीयते ।**

**तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्ततः ।। ३.३५ ।।**

सुषुप्ते हि तत् (मनः) लीयते। निगृहीतं (तत्) (मनः) न लीयते। तदेव निर्भयं ब्रह्म समन्ततः ज्ञानालोकं (भवति)।

लीयते सुषुप्तौ हि यस्मात् सर्वाभिरविद्यादि-प्रत्यय-बीज-वासनाभिः सह तमोरूपम् अविशेष-रूपं बीजभावमापद्यते। तद्विवेक-विज्ञान-पूर्वकं निगृहीतं निरुद्धं सद् न लीयते तमोबीज-भावं नापद्यते।

तस्माद्युक्तः प्रचार-भेदः सुषुप्तस्य समाहितस्य च मनसः।

यदा ग्राह्य-ग्राहकाविद्या-कृत-मल-द्वय-वर्जितम्, तदा परम् अद्वयं ब्रह्मैव तत्संवृत्तम् इत्यतः तदेव निर्भयम्, द्वैत-ग्रहणस्य भय-निमित्तस्याभावात्।

शान्तमभयं ब्रह्म यद्विद्वान्न बिभेति कुतश्चन।

तदेव विशेष्यते - ज्ञप्तिर्ज्ञानम् आत्म-स्वभाव-चैतन्यम्, तदेव ज्ञानमालोकः प्रकाशो यस्य तद्ब्रह्म ज्ञानालोकं

विज्ञानैक-रस-घनमित्यर्थः।

समन्ततः समन्तात्। सर्वतो व्योमवद् नैरन्तर्येण व्यापकमित्यर्थः।। (३.३५)

**अजमनिद्रमस्वप्नमनामकमरूपकम् ।**

**सकृद्विभातं सर्वज्ञं नोपचारः कथञ्चन ।। ३.३६ ।।**

(तद् ब्रह्म) अजमनिद्रमस्वप्नमनामकमरूपकम् सकृद्विभातं सर्वज्ञम्। उपचारः कथञ्चन न भवति।

जन्म-निमित्ताभावात् सबाह्याभ्यन्तरम् अजम्। अविद्या-निमित्तं हि जन्म, रज्जु-सर्पवद् इत्यवोचाम।

सा चाविद्या आत्म-सत्यानुबोधेन निरुद्धा। यतः अजम्, अत एव अनिद्रम्। अविद्या-लक्षणाऽनादिर्माया निद्रा।

स्वापात्प्रबुद्धः अद्वय-स्वरूपेणात्मना अतः अस्वप्नम्। अप्रबोध-कृते ह्यस्य नामरूपे।

प्रबोधाच्च ते रज्जु-सर्पवद् विनष्टे इति न नाम्नाभिधीयते ब्रह्म, रूप्यते वा न केनचित्प्रकारेण इति अनामकम्

अरूपकं च तत्। यतो वाचो निवर्तन्ते(तै. २.४.१) इत्यादि-श्रुतेः।

किञ्च, सकृद्विभातं सदैव विभातं सदा भारूपम्।

अग्रहणान्यथाग्रहणाविर्भाव-तिरोभाव-वर्जितत्वात्।

ग्रहणाग्रहणे हि रात्र्यहनी। तमश्च अविद्या-लक्षणं सदा अप्रभातत्वे कारणम्।

तदभावान्नित्य-चैतन्य-भा-रूपत्वाच्च युक्तं सकृद्विभातमिति।

अत एव सर्वं च तद् ज्ञ-स्वरूपं चेति सर्वज्ञम्।

न इह ब्रह्मण्येवंविधे उपचरणम् उपचारः कर्तव्यः। यथा अन्येषामात्म-स्वरूप-व्यतिरेकेण समाधानाद्युपचारः।

नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावत्वाद् ब्रह्मणः न कथञ्चन कथञ्चिदपि कर्तव्य-सम्भवः अविद्या-नाशे इत्यर्थः।।

(३.३६)

अनामकत्वाद्युक्तार्थ-सिद्धये हेतुमाह -

**सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः ।**

**सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः ।। ३.३७ ।।**

(सः ब्रह्माभिन्नः विद्वान्) सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः सुप्रशान्तः सकृज्ज्योतिः समाधिरचलः अभयः (भवति)।

अभिलप्यते अनेनेति अभिलापः वाक्-करणं सर्वप्रकारस्याभिधानस्य, तस्माद्विगतः। वागत्रोपलक्षणार्था।

सर्व-बाह्य-करण-वर्जितः इत्येतत्। तथा सर्व-चिन्ता-समुत्थितः चिन्त्यते अनयेति चिन्ता बुद्धिः, तस्याः समुत्थितः। अन्तःकरण-वर्जित इत्यर्थः। अप्राणो ह्यमनाः शुभ्रः ह्यक्षरात्परतः परः(मु. २.१.२) इति श्रुतेः।

यस्मात् सर्व-विशेष-वर्जितः अतः सुप्रशान्तः। सकृज्ज्योतिः सदैव ज्योतिः आत्म-चैतन्य-स्वरूपेण।

समाधिः समाधि-निमित्त-प्रज्ञावगम्यत्वात्। समाधीयते अस्मिन्निति वा समाधिः।

अचलः अविक्रियः। अत एव अभयः विक्रियाभावात्।। (३.३७)

यस्माद् ब्रह्मैव समाधिरचलोऽभयः (३.३७) इत्युक्तम्, अतः -

**ग्रहो न तत्र नोत्सर्गश्चिन्ता यत्र न विद्यते ।**

**आत्मसंस्थं तदा ज्ञानमजाति समतां गतम् ।। ३.३८ ।।**

यत्र चिन्ता न विद्यते तत्र ग्रहो न, उत्सर्गः न, तदा आत्मसंस्थं ज्ञानम् अजाति समतां गतम्।

न तत्र तस्मिन्ब्रह्मणि ग्रहः ग्रहणमुपादानम्, न उत्सर्गः उत्सर्जनं हानं वा विद्यते।

यत्र हि विक्रिया तद्विषयत्वं वा, तत्र हानोपादाने स्याताम्। न तद्द्वयमिह ब्रह्मणि सम्भवति।

विकार-हेतोरन्यस्याभावान्निरवयवत्वाच्च। अतो न तत्र हानोपादाने इत्यर्थः।

चिन्ता यत्र न विद्यते, सर्वप्रकारैव चिन्ता न सम्भवति यत्र अमनस्त्वात्, कुतस्तत्र हानोपादाने इत्यर्थः।

यदैव आत्म-सत्यानुबोधो जातः, तदा एव आत्मसंस्थं विषयाभावाद् अग्न्युष्णवद् आत्मन्येव स्थितं ज्ञानम्।

अजाति जाति-वर्जितम्।

समतां गतं परं साम्यमापन्नं भवति। यदादौ प्रतिज्ञातम् अतो वक्ष्याम्यकार्पण्यमजाति समतां गतम् (३.२)

इति, इदं तदुपपत्तितः शास्त्रतः चोक्तमुपसंह्रियते - अजाति समतां गतमिति।

एतस्माद् आत्म-सत्यानुबोधात् कार्पण्य-विषयमन्यत्।

यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः (बृ. ३.८.१०) इति श्रुतेः।

प्राप्यैतत्सर्वः कृतकृत्यो ब्राह्मणो भवतीत्यभिप्रायः।। (३.३८)

**अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः ।**

**योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ।। ३.३९ ।।**

अस्पर्शयोगो वै नाम सर्वयोगिभिः दुर्दर्शः (भवति) । अभये भयदर्शिनः योगिनः हि अस्माद् बिभ्यति।

यद्यपीदमित्थं परमार्थ-तत्त्वम्, अस्पर्शयोगो नाम अयं सर्व-सम्बन्धाख्य-स्पर्श-वर्जितत्वाद् अस्पर्शयोगो नाम वै स्मर्यते प्रसिद्धम् उपनिषत्सु।

दुःखेन दृश्यत इति दुर्दर्शः सर्वैः योगिभिः वेदान्त-विहित-विज्ञानरहितैः सर्वयोगिभिः। आत्म-सत्यानुबोधायास-लभ्य एवेत्यर्थः।

योगिनः बिभ्यति हि अस्मात् सर्व-भय-वर्जितादपि आत्म-नाश-रूपमिमं योगं मन्यमाना भयं कुर्वन्ति।

अभये अस्मिन् भयदर्शिनः भय-निमित्तात्म-नाश-दर्शन-शीलाः अविवेकिनः इत्यर्थः।। (३.३९)

येषां पुनर्ब्रह्म-स्वरूप-व्यतिरेकेण रज्जु-सर्पवत् कल्पितमेव मन इन्द्रियादि च, न परमार्थतो विद्यते, तेषां ब्रह्म-स्वरूपाणाम् अभयं मोक्षाख्या च अक्षया शान्तिः स्वभावत एव सिद्धा, नान्यायत्ता, नोपचारः कथञ्चन (का. ३.३६) इत्यवोचाम। ये त्वतोऽन्ये -

**मनसो निग्रहायत्तमभयं सर्वयोगिनाम् ।**

**दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च ।। ३.४० ।।**

सर्वयोगिनाम् अभयं मनसो निग्रहायत्तम् (भवति)। दुःखक्षयः प्रतिबोधः च (मनोनिग्रहायत्तः भवति)। अक्षया शान्तिः एव च अपि (मनोनिग्रहायत्ता भवति)।

योगिनो मार्गगा हीन-मध्यम-दृष्टयो मनोऽन्यदात्म-व्यतिरिक्तम् आत्म-सम्बन्धि पश्यन्ति, तेषामात्म-सत्यानुबोध-रहितानां मनसो निग्रहायत्तमभयं सर्वेषां योगिनाम्। किञ्च, दुःखक्षयः अपि। न हि आत्म-सम्बन्धिनि मनसि प्रचलिते दुःखक्षयः अस्त्यविवेकिनाम्। किञ्च, आत्म-प्रबोधः अपि मनोनिग्रहायत्तः एव। तथा, अक्षया अपि मोक्षाख्या शान्तिः तेषां मनोनिग्रहायत्ता एव।। (३.४०)

**उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना ।**

**मनसो निग्रहस्तद्वद् भवेदपरिखेदतः ।। ३.४१ ।।**

यद्वत् कुशाग्रेण एकबिन्दुना उदधेः उत्सेकः (भवति) तद्वद् मनसो निग्रहः अपरिखेदतः भवेत्।। ४१।।

मनोनिग्रहः अपि तेषाम् उदधेः कुशाग्रेण एकबिन्दुना उत्सेचनेन शोषण-व्यवसायवद् व्यवसायवताम् अनवसन्नान्तःकरणानामनिर्वेदात् अपरिखेदतः भवति इत्यर्थः।। (३.४१)

किमपरिखिन्न-व्यवसायमात्रमेव मनोनिग्रहे उपायः नेत्युच्यते -

**उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः ।**

**सुप्रसन्नं लये चैव यथा कामो लयस्तथा ।। ३.४२ ।।**

कामभोगयोः[७.२] विक्षिप्तं (मनः) (कश्चन) उपायेन निगह्णीयात्। लये सुप्रसन्नम् च एव (अपि) (मनः साधकः) निगृह्णीयात्। यथा कामः (अनर्थहेतुः) तथा लयः (अपि अनर्थहेतुः भवति)।। ४२।।

काम्यते इति कामः। तदेव भोगः भुज्यते इति भोगः। प्राप्तेः पूर्वं कामः। प्राप्तेः अनन्तरं कामः एव भोगः भवति। कामाश्च भोगदाश्च विषयाः कामभोगौ। तयोः सप्तमी द्विवचनम्। जातौ एकवचनम्। विषयेषु इत्यर्थः।

अपरिखिन्न-व्यवसायवान्सन्, वक्ष्यमाणेन उपायेन काम-भोग-विषयेषु विक्षिप्तं मनो निगृह्णीयाद् निरुन्ध्याद् आत्मन्येव इत्यर्थः।

किञ्च लीयतेऽस्मिन्निति सुषुप्तो लयः। तस्मिन् लये च सुप्रसन्नम् आयास-वर्जितमपीत्येतत्। निगृह्णीयादित्यनुवर्तते। सुप्रसन्नं चेत् कस्मान्निगृह्यते इत्युच्यते - यस्माद् यथा कामः अनर्थ-हेतुः, तथा लयः अपि। अतः काम-विषयस्य मनसो निग्रहवद् लयादपि निरोद्धव्यमित्यर्थः।। (३.४२)

कः स उपायः इत्युच्यते -

**दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् ।**

**अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति ।। ३.४३ ।।**

सर्वं[१.१.] दुःखम्[१.१.] (इति) अनुस्मृत्य कामभोगाद् (मनः) निवर्तयेत्। सर्वम् अजम् (बाधसामानाधिकरण्यम्) (इति) अनुस्मृत्य जातं (अथवा द्वैतजातं) नैव तु पश्यति (परन्तु किं पश्यति। सर्वं ब्रह्म इति पश्यति।))।

सर्वं द्वैतमविद्या-विजृम्भितं दुःखम् एव इति अनुस्मृत्य कामभोगाद् काम-निमित्तो भोगः इच्छा-विषयः तस्माद्

विप्रसृतं मनो निवर्तयेत् वैराग्य-भावनयेत्यर्थः।

अजं ब्रह्म सर्वम् इत्येतच्छास्त्राचार्योपदेशतः अनुस्मृत्य तद्विपरीतं द्वैत-जातं नैव तु पश्यति अभावात्।।

(३.४३)

एवमनेन ज्ञानाभ्यास-वैराग्य-द्वयोपायेन -

**लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।**

**सकषायं विजानीयात्समप्राप्तं न चालयेत् ।। ३.४४ ।।**

**नास्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ।**

**निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ।। ३.४५ ।।**

लये (सति) चित्तं संबोधयेत्। विक्षिप्तं (मनः) पुनः शमयेत्। (अन्तरालावस्थं मनः) सकषायम् (इति) विजानीयात्। समप्राप्तं मनः न चालयेत्।। ४४

तत्र सुखं न आस्वादयेत्। प्रज्ञया निःसङ्गः भवेत्। निश्चलं निश्चरत् चित्तम् प्रयत्नतः एकीकुर्यात् ।। ४५

लये सुषुप्ते लीनं सम्बोधयेत् मनः। आत्म-विवेक-दर्शनेन योजयेत्। चित्तं मन इत्यनर्थान्तरम्।

विक्षिप्तं च काम-भोगेषु शमयेत्पुनः।

एवं पुनः पुनरभ्यस्यतो लयात्सम्बोधितं विषयेभ्यश्च व्यावर्तितम्, नापि साम्यापन्नमन्तरालावस्थं सकषायं

सरागं बीज-संयुक्तं मन इति विजानीयात्। ततोऽपि यत्नतः साम्यमापादयेत्। यदा तु सम-प्राप्तं भवति - सम-

प्राप्त्यभिमुखीभवतीत्यर्थः - ततः तद् न विचालयेत्। विषयाभिमुखं न कुर्यादित्यर्थः।। (३.४४)

समाधित्सतो योगिनो यत्सुखं जायते, तद् नास्वादयेत्। तत्र न रज्येतेत्यर्थः।

कथं तर्हि निःसङ्गः निःस्पृहः प्रज्ञया विवेक-बुद्ध्या।

यदुपलभ्यते सुखम्, तदविद्या-परिकल्पितं मृषैवेति विभावयेत्। ततोऽपि सुख-रागान्निगृह्णीयादित्यर्थः।

यदा पुनः सुख-रागान्निवृत्तं निश्चल-स्वभावं सद् निश्चरत् बहिर्निर्गच्छद् भवति चित्तम्, ततस्ततो नियम्य

उक्तोपायेन आत्मन्येव एकीकुर्यात् प्रयत्नतः। चित्स्वरूप-सत्ता-मात्रमेव आपादयेदित्यर्थः।। (३.४५)

**यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।**

**अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा ।। ३.४६ ।।**

यदा चित्तं न लीयते, पुनः न च विक्षिप्यते तदा तत् अनिङ्गनम् अनाभासं (चित्तम्) ब्रह्म निष्पन्नम् (ब्रह्मत्वेन निष्पन्नम्, ब्रह्म भवति) । ४६।।

यथोक्तेनोपायेन निगृहीतं चित्तं यदा सुषुप्ते न लीयते, न च पुनर्विषयेषु विक्षिप्यते।

अनिङ्गनम् अचलं निवात-प्रदीप-कल्पम्। अनाभासं न केनचित्कल्पितेन विषय-भावेनावभासते इति।

यदा एवंलक्षणं चित्तम्, तदा निष्पन्नं ब्रह्म। ब्रह्म-स्वरूपेण निष्पन्नं चित्तं भवतीत्यर्थः।। (३.४६)

**स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् ।**

**अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते ।। ३.४७ ।।**

(ब्रह्मविदः आत्मज्ञानं) स्वस्थं शान्तं सनिर्वाणमकथ्यं उत्तमं सुखम् अजम् अजेन ज्ञेयेन (अभिन्नम्) सर्वज्ञं परिचक्षते।

यथोक्तं परमार्थ-सुखम् आत्म-सत्यानुबोध-लक्षणं स्वस्थं स्वात्मनि स्थितम्। शान्तं सर्वानर्थोपशम-रूपम्।

सनिर्वाणम् निर्वृतिर्निर्वाणं कैवल्यम्, सह निर्वाणेन वर्तते। तच्च अकथ्यं न शक्यते कथयितुम्, अत्यन्तासाधारण-विषयत्वात्। सुखमुत्तमं निरतिशयं हि तद्योगि-प्रत्यक्षमेव।

न जातमिति अजम् यथा विषयविषयम्। अजेन अनुत्पन्नेन ज्ञेयेन अव्यतिरिक्तं सत् स्वेन सर्वज्ञ-रूपेण सर्वज्ञं ब्रह्मैव सुखं परिचक्षते कथयन्ति ब्रह्मविदः।। (३.४७)

सर्वोऽप्ययं मनोनिग्रहादिः मृल्लोहादिवत् सृष्टिरुपासना च उक्ता परमार्थ-स्वरूप-प्रतिपत्त्युपायत्वेन,

न परमार्थसत्येति। परमार्थ-सत्यं तु -

**न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते ।**

**एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ।। ३.४८ ।।**

कश्चिद् जीवः न जायते। अस्य संभवः न विद्यते। एतत् तत् उत्तमं सत्यं यत्र किंचिन्न जायते।। ४८।।

न कश्चिज्जायते जीवः कर्ता भोक्ता च नोत्पद्यते केनचिदपि प्रकारेण।

अतः स्वभावतः अजस्य अस्य एकस्यात्मनः सम्भवः कारणं न विद्यते नास्ति।

यस्मान्न विद्यतेऽस्य कारणम्, तस्मान्न कश्चिज्जायते जीव इत्येतत्। पूर्वेषूपायत्वेनोक्तानां सत्यानाम् एतद् उत्तमं

सत्यं यस्मिन् सत्य-स्वरूपे ब्रह्मणि अणुमात्रमपि किञ्चिन्न जायते इति।। (३.४८)

।। इति तृतीयं अद्वैतप्रकरणं सम्पूर्णम्।।